# SaubhagyalakShmi Upanishad

# સૌભાગ્યલક્ષ્મ્યુપનિષત્

## Document Information

Text title : Saubhagyalaksmi Upanishad

File name : saubhagya.itx

Category : upanishhat, veda, rigveda

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 105 / 108; Rigveda - shakta upanishad

Latest update : April 24, 2000, June 22, 2011

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

SaubhagyalakShmi Upanishad

# સૌભાગ્યલક્ષ્મ્યુપનિષત્

(ઋગ્વેદીયા)

સૌભાગ્યલક્ષ્મીકૈવલ્યવિદ્યાવેદ્યસુખાકૃતિ ।
ત્રિપાન્નારાયણાનન્દરમચન્દ્રપદં ભજે ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ
પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ ॥

વેદસ્ય મ આણીસ્થઃ શ્રુતં મે મા
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્સન્દધામ્યૃતં
વદિષ્યામિ સત્યં વદિષ્યામિ ॥

તન્મામવતુ તદ્વક્તારમવતુ અવતુ મામવતુ
વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

(સૌભાગ્યલક્ષ્મીવિદ્યાજિજ્ઞાસા)

હરિઃ ૐ ॥ અથ ભગવન્તં દેવા ઊચુર્હે
ભગવન્નઃ કથય સૌભાગ્યલક્ષ્મીવિદ્યામ્ ।

તથેત્યવોચદ્ભગવાનાદિનારાયણઃ સર્વે દેવા
યૂયં સાવધાનમનસો ભૂત્વા શ‍ૃણુત
તુરીયરૂપાં તુરીયાતીતાન્ સર્વોત્કટાં
સર્વમન્ત્રાસનગતાં પીઠોપપીઠદેવતાપરિવૃતાં
ચતુર્ભુજાં શ્રિયં હિરણ્યવર્ણામિતિ
પઞ્ચદશર્ગ્ભિર્ધ્યાયેત્ । અથ પઞ્ચદશ
ઋગાત્મકસ્ય શ્રીસૂક્તસ્યાનન્દકર્દમચિક્લીતેન્દિરાસુતા
ઋષયઃ । શ્રીઋષ્યાદ્યા ઋચઃ
ચતુર્દશાનમૃચામાનન્દાદ્યૃષયઃ ।

હિરણ્યવર્ણાદ્યાદ્યત્રયસ્યાનુષ્ટુપ્ છન્દઃ ।
કાંસોસ્મીત્યસ્ય બૃહતી છન્દઃ ।
તદન્યયોર્દ્વયોસ્ત્રિષ્ટુપ્ । પુનરષ્ટકસ્યાનુષ્ટુપ્ ।
શેષસ્ય પ્રસ્તારપઙ્ક્તિઃ । શ્ર્યગ્નિર્દેવતા ।
હિરણ્યવર્ણામિતિ બીજમ્ । કાંસોઽસ્મીતિ શક્તિઃ ।
હિરણ્મયા ચન્દ્રા રજતસ્રજા હિરણ્યા હિરણ્યવર્ણેતિ
પ્રણવાદિનમોન્તૈશ્ચતુર્થ્યન્તૈરઙ્ગન્યાસઃ ।
અથ વક્ત્રત્રયૈરઙ્ગન્યાસઃ । મસ્તકલોચનશ્રુતિઘ્રાણ-
વદનકણ્ઠબાહુદ્વયહૃદયનાભિગુહ્યપાયૂરુજાનુજઙ્ઘેષુ
શ્રીસૂક્તૈરેવ ક્રમશો ન્યસેત્ । અરુણકમલસંસ્થા
તદ્રજઃપુઞ્જવર્ણા કરકમલધૃતેષ્ટાઽભીતિયુગ્મામ્બુજા ચ ।
મણિકટકવિચિત્રાલઙ્કૃતાકલ્પજાલૈઃ સકલભુવનમાતા
સન્તતં શ્રીઃ શ્રિયૈ નઃ ॥ ૧॥

(સૌભગ્યલક્ષ્મીચક્રમ્)

તત્પીઠકર્ણિકાયાં સસાધ્યં શ્રીબીજમ્ ।
વસ્વાદિત્યકલાપદ્મેષુ શ્રીસૂક્તગતાર્ધાર્ધર્ચા
તદ્બહિર્યઃ શુચિરિતિ માતૃકયા ચ શ્રિયં યન્ત્રાઙ્ગદશકં
ચ વિલિખ્ય શ્રિયમાવાહયેત્ । અઙ્ગૈઃ પ્રથમા વૃત્તિઃ ।
પદ્માદિભિર્દ્વિતીયા । સોકેશૈસ્તૃતીયા । તદાયુધૈસ્તુરીયા
વૃત્તિર્ભવતિ । શ્રીસૂક્તૈરાવાહનાદિ । ષોડશસહસ્રજપઃ ।

(એકાક્ષરીમન્ત્રસ્ય ઋષ્યાદિ)

સૌભાગ્યરમૈકાક્ષર્યા ભૃગુનિચૃદ્ગાયત્રી । શ્રિય ઋષ્યાદયઃ ।
શમિતિ બીજશક્તિઃ । શ્રીમિત્યાદિ ષડઙ્ગમ્ । ભૂયાદ્ભૂયો
દ્વિપદ્માભયવરદકરા તપ્તકાર્તસ્વરાભા શુભ્રાભ્રાભેભયુગ્મ-
દ્વયકરધૃતકુમ્ભાદ્ભિરાસિચ્યમાના । રક્તૌઘાબદ્ધમૌલિ-
ર્વિમલતરદુકૂલાર્તવાલેપનાઢ્યા પદ્માક્ષી પદ્મનાભોરસિ
કૃતવસતિઃ પદ્મગા શ્રીઃ શ્રિયૈ નઃ ॥ ૧॥

(એકાક્ષરીચક્રમ્)

તત્પીઠમ્ । અષ્ટપત્રં વૃત્તત્રયં દ્વાદશરાશિખણ્ડં
ચતુરસ્રં રમાપીઠં ભવતિ । કર્ણિકાયાં સસાધ્યં શ્રીબીજમ્ ।

વિભૂતિરુન્નતિઃ કાન્તિઃ સૃષ્ટિઃ કીર્તિઃ સન્નતિર્વ્યુષ્ટિઃ
સત્કૃષ્ટિરૃદ્ધિરિતિ પ્રણવાદિનમો તૈશ્ચતુર્થ્યન્તૈર્નવશક્તિં
યજેત્ । અઙ્ગે પ્રથમા વૃતિઃ ।
વાસુદેવાભિર્દ્વિતીયા । બાલાક્યાદિભિસ્તૃતીયા ।
ઇન્દ્રાદિભિશ્ચતુર્થી ભવતિ ।
દ્વાદશલક્ષજપઃ ।

(લક્ષ્મીમન્ત્રવિશેષાઃ)

શ્રીલક્ષ્મીર્વરદા વિષ્ણુપત્ની
વસુપ્રદા હિરણ્યરૂપા
સ્વર્ણમાલિની રજતસ્રજા સ્વર્ણપ્રભા સ્વર્ણપ્રાકારા
પદ્મવાસિની પદ્મહસ્તા
પદ્મપ્રિયા મુક્તાલઙ્કારા ચન્દ્રસૂર્યા બિલ્વપ્રિયા ઈશ્વરી
ભુક્તિર્મુક્તિર્વિભૂતિરૃદ્ધિઃ સમૃદ્ધિઃ કૃષ્ટિઃ
પુષ્ટિર્ધનદા ધનેશ્વરી
શ્રદ્ધા ભોગિની ભોગદા સાવિત્રી ધાત્રી
વિધાત્રીત્યાદિપ્રણવાદિનમોન્તાશ્ચતુર્થ્યન્તા
મન્ત્રાઃ । એકાક્ષરવદઙ્ગાદિપીઠમ્ । લક્ષજપઃ ।
દશાંશં તર્પણમ્ ।
દશાંશં હવનમ્ । દ્વિજતૃપ્તિઃ । નિષ્કામાનામેવ
શ્રીવિદ્યાસિદ્ધિઃ ।
ન કદાપિ સકામાનામિતિ ॥ ૧॥

દ્વિતીયઃ ખણ્ડઃ

(ઉત્તમાધિકારિણાં જ્ઞાનયોગઃ)

અથ હૈનં દેવા ઊચુસ્તુરીયયા માયયા નિર્દિષ્ટં
તત્ત્વં બ્રૂહીતિ । તથેતિ સ હોવાચ ।
યોગેન યોગો જ્ઞાતવ્યો યોગો યોગાત્પ્રવર્ધતે ।
યોઽપ્રમત્તસ્તુ યોગેન સ યોગી રમતે ચિરમ્ ॥ ૧॥

સમાપ્યય્ય નિદ્રાં સુજીર્ણેઽલ્પભોજી
    શ્રમત્યાજ્યબાધે વિવિક્તે પ્રદેશે ।
સદા શીતનિસ્તૃષ્ણ એષ પ્રયત્નોઽથ

વા પ્રાણરોધો નિજાભ્યાસમાર્ગાત્ ॥ ૨॥

વક્ત્રેણાપૂર્ય વાયું હુતવલનિલયેઽપાનમાકૃષ્ય ધૃત્વા
સ્વાઙ્ગુષ્ઠાદ્યઙ્ગુલીભિર્વરકરતલયોઃ ષડ્ભિરેવં નિરુધ્ય ।
શ્રોત્રે નેત્રે ચ નાસાપુટયુગલમતોઽનેન માર્ગેણ સમ્યક્-
પશ્યન્તિ પ્રત્યયાશં પ્રણવબહુવિધધ્યાનસંલીનચિત્તાઃ ॥ ૩॥

(નાદાવિર્ભાવપૂર્વકો ગ્રન્થિત્રયભેદઃ)

શ્રવણમુખનયનનાસાનિરોધનેનૈવ કર્તવ્યમ્ ।
શુદ્ધસુષુમ્નાસરણૌ સ્ફુટમમલં શ્રૂયતે નાદઃ ॥ ૪॥

વિચિત્રઘોષસંયુક્તાનાહતે શ્રૂયતે ધ્વનિઃ ।
દિવ્યદેહશ્ચ તેજસ્વી દિવ્યગન્ધોઽપ્યરોગવાન્ ॥ ૫॥

સમ્પૂર્ણહૃદયઃ શૂન્યે ત્વારમ્ભે યોગવાન્ભવેત્ ।
દ્વિતીયા વિઘટીકૃત્ય વાયુર્ભવતિ મધ્યગઃ ॥ ૬॥

દૃઢાસનો ભવેદ્યોગી પદ્માદ્યાસનસંસ્થિતઃ ।
વિષ્ણુગ્રન્થેસ્તતો ભેદાત્પરમાનન્દસમ્ભવઃ ॥ ૭॥

અતિશૂન્યો વિમર્દશ્ચ ભેરીશબ્દસ્તતો ભવેત્ ।
તૃતીયાં યત્નતો ભિત્ત્વા નિનાદો મર્દલધ્વનિઃ ॥ ૮॥

(અખણ્ડબ્રહ્માકારવૃત્તિઃ)

મહાશૂન્યં તતો યાતિ સર્વસિદ્ધિસમાશ્રયમ્ ।
ચિત્તાનન્દં તતો ભિત્ત્વા સર્વપીઠગતાનિલઃ ॥ ૯॥

નિષ્પત્તૌ વૈષ્ણવઃ શબ્દઃ ક્વણતીતિ ક્વણો ભવેત્ ।
એકીભૂતં તદા ચિત્તં સનકાદિમુનીડિતમ્ ॥ ૧૦॥

અન્તેઽનન્તં સમારોપ્ય ખણ્ડેઽખણ્ડં સમર્પયન્ ।
ભૂમાનં પ્રકૃતિં ધ્યાત્વા કૃતકૃત્યોઽમૃતો ભવેત્ ॥ ૧૧॥

(નિર્વિકલ્પભાવઃ)

યોગેન યોગં સંરોધ્ય ભાવં ભાવેન ચાઞ્જસા ।
નિર્વિકલ્પં પરં તત્ત્વં સદા ભૂત્વા પરં ભવેત્ ॥ ૧૨॥

અહંભાવં પરિત્યજ્ય જગદ્ભાવમનીદૃશમ્ ।

નિર્વિકલ્પે સ્થિતો વિદ્વાન્ભૂયો નાપ્યનુશોચતિ ॥ ૧૩॥

સલિલે સૈન્ધાવં યદ્વત્સામ્યં ભવતિ યોગતઃ ।
તથાત્મમનસૌરૈક્યં સમાધિરભિધીયતે ॥ ૧૪॥

યદા સંક્ષીયતે પ્રાણો માનસં ચ પ્રલીયતે ।
તદા સમરસત્વં યત્સમાધિરભિધીયતે ॥ ૧૫॥

યત્સમત્વં તયોરત્ર જીવાત્મપરમાત્મનોઃ ।
સમસ્તનષ્ટસઙ્કલ્પઃ સમાધિરભિધીયતે ॥ ૧૬॥

પ્રભાશૂન્યં મનઃશૂન્યં બુદ્ધિશૂન્યં નિરામયમ્ ।
સર્વશૂન્યં નિરાભાસં સમાધિરભિધીયતે ॥ ૧૭॥

તૃતીય ખણ્ડઃ

(આધારચકમ્)

સ્વયમુચ્ચલિતે દેહે દેહી નિત્યસમાધિના ।
નિશ્ચલં તં વિજાનીયાત્સમાધિરભિધીયતે ॥ ૧૮॥

યત્રયત્ર મનો યાતિ તત્રતત્ર પરં પદમ્ ।
તત્રતત્ર પરં બ્રહ્મ સર્વત્ર સમવસ્થિતમ્ ॥ ૧૯॥ ઇતિ॥ ॥ ૨॥

અથ હૈનં દેવા ઊચુર્નવચક્રવિવેકમનુબ્રૂહીતિ ।
તથેતિ સ હોવાચ આધારે બ્રહ્મચક્રં ત્રિરાવૃત્તં
ભગમણ્ડલાકારમ્ । તત્ર મૂલકન્દે શક્તિઃ પાવકાકારં
ધ્યાયેત્ । તત્રૈવ કામરૂપપીઠં સર્વકામપ્રદં ભવતિ ।
ઇત્યાધારચક્રમ્ । દ્વિતીયં સ્વાધિષ્ઠાનચક્રં
ષડ્દલમ્ । તન્મધ્યે પશ્ચિમાભિમુખં લિઙ્ગં
પ્રવાલાઙ્કુરસદૃશં ધ્યાયેત્ । તત્રૈવોડ્યાણપીઠં
જગદાકર્ષણસિદ્ધિદં ભવતિ । તૃતીયં
નાભિચક્રં પઞ્ચાવર્તં સર્પકુટિલાકારમ્ ।
તન્મધ્યે કુણ્ડલિનીં બાલાર્કકોટિપ્રભાં
તનુમધ્યાં ધ્યાયેત્ । સામર્થ્યશક્તિઃ સર્વસિદ્ધિપ્રદા
ભવતિ । મણિપૂરચક્રં હૃદયચક્રમ્ ।
અષ્ટદલમધોમુખમ્ । તન્મધ્યે જ્યોતિર્મયલિઙ્ગાકારં
ધ્યાયેત્ । સૈવ હંસકલા સર્વપ્રિયા સર્વલોકવશ્યકરી

ભવતિ । કણ્ઠચક્રં ચતુરઙ્ગુલમ્ । તત્ર વામે ઇડા
ચન્દ્રનાડી દક્ષિણે પિઙ્ગલા સૂર્યનાડી તન્મધ્યે સુષુમ્નાં
શ્વેતવર્ણાં ધ્યાયેત્ । ય એવં વેદાનાહતા સિદ્ધિદા ભવતિ ।
તાલુચક્રમ્ । તત્રામૃતધારાપ્રવાહઃ ।
ઘણ્ટિકાલિઙ્ગમૂલચક્રરન્ધ્રે રાજદન્તાવલમ્બિનીવિવરં
દશદ્વાદશારમ્ । તત્ર શૂન્યં ધ્યાયેત્ । ચિત્તલયો ભવતિ ।
સપ્તમં ભ્રૂચક્રમઙ્ગુષ્ઠમાત્રમ્ । તત્ર જ્ઞાનનેત્રં
દીપશિખાકારં ધ્યાયેત્ । તદેવ કપાલકન્દવાક્સિદ્ધિદં
ભવતિ । આજ્ઞાચક્રમષ્ટમમ્ । બ્રહ્મરન્ધ્રં નિર્વાણચક્રમ્ ।
તત્ર સૂચિકાગૃહેતરં ધૂમ્રશિખાકારં ધ્યાયેત્ । તત્ર
જાલન્ધરપીઠં મોક્ષપ્રદં ભવતીતિ પરબ્રહ્મચક્રમ્ ।
નવમમાકાશચક્રમ્ । તત્ર ષોડશદલપદ્મમૂર્ધ્વમુખં
તન્મધ્યકર્ણિકાત્રિકૂટાકારમ્ । તન્મધ્યે ઊર્ધ્વશક્તિઃ ।
તાં પશ્યન્ધ્યાયેત્ । તત્રૈવ પૂર્ણગિરિપીઠં
સર્વેચ્છાસિદ્ધિસાધનં ભવતિ । સૌભાગ્યલક્ષ્મ્યુપનિષદં
નિત્યમધીતે યોઽગ્નિપૂતો ભવતિ । સ વાયુપૂતો ભવતિ । સ
સકલધનધાન્યસત્પુત્રકલત્રહયભૂગજપશુમહિષીદાસીદાસ-
યોગજ્ઞાનવાન્ભવતિ । ન સ પુનરાવર્તતે ન સ પુનરાવર્તત
ઇત્યુપનિષત્ ।

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ પ્રતિષ્ઠિતમ્
આવિરાવીર્મ એધિ ॥ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે મા
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્સન્દધામ્યૃતં વદિષ્યામિ
સત્યં વદિષ્યામિ ॥ તન્મામવતુ તદ્વક્તારમવતુ અવતુ મામવતુ
વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ શ્રીસૌભાગ્યલક્ષ્મ્યુપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*SaubhagyalakShmi Upanishad*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*